**Series RHB**

Code No. **52**
कोड नं.

Roll No.
रोल नं.

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer script during this period.
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

## सङ्कलनात्मकं मूल्याङ्कनम् – II

## SUMMATIVE ASSESSMENT – II

# संस्कृतम् (सम्प्रेषणाधारितम्)

# COMMUNICATIVE SANSKRIT

*अवधिः : होरात्रयम्* | *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

*Time allowed : 3 hours* | *Maximum Marks : 80*

खण्डः क : अपठितांश-अवबोधनम् / अपठित-अवबोधन — 12 अंकाः

Section A : Unseen Reading Comprehension

खण्डः ख : रचनात्मककार्यम् / रचनात्मक-कार्य — 12 अंकाः

Section B : Writing Skills

खण्डः ग : अनुप्रयुक्तव्याकरणम् / अनुप्रयुक्त व्याकरण — 28 अंकाः

Section C : Applied Grammar

खण्डः घ : पठित-अवबोधनम् / पठित-अवबोधन — 28 अंकाः

Section D : Reading Comprehension

***Instructions :***

***निर्देश :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में चार खण्ड हैं ।*
*The question paper has four sections.*

*(ii)* *प्रतिखण्डम् उत्तराणि प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर दी गई उत्तर-पुस्तिका में ही लिखने हैं ।*
*The answers have to be written in the answer-sheet.*

*(iii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*
*The answers to each section must be written at one place.*

*(iv)* *प्रश्नपत्रे उत्तराणि न लेखनीयानि ।*
*प्रश्न-पत्र पर उत्तर न लिखें ।*
*Don't write answers in the question paper.*

*(v)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।*
*Write the question number according to the question paper.*

*(vi)* *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि ।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए ।*
*Answer all the questions in* ***Sanskrit****.*

## खण्डः क (Section A)
## अपठितांश-अवबोधनम् (अपठित-अवबोधन)
## Unseen Reading Comprehension

12 अंकाः

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत :
निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर लिखिए :
Read the following passage and answer the given questions :

एकस्मिन् नगरे द्वे मित्रे वसतः स्म । एकस्य नाम सोमेशः आसीत् अन्यस्य नाम धनेशः आसीत् । सोमेशः विद्याम् इच्छति स्म धनेशः च प्रभूतं धनम् । एकदा मित्रद्वयं विदेशम् अगच्छत् । तत्र सोमेशः परिश्रमेण अध्ययनं कृत्वा विद्यां प्राप्तवान् । धनेशः बहु धनसङ्ग्रहणं कृतवान् । एवम् अनेकानि वर्षाणि व्यतीतानि । तौ अचिन्तयताम् — 'अधुना आवां गृहं गच्छावः' । गृहम् प्रति आगमनसमये मार्गे चौराः आगच्छन् । ते धनेशस्य सर्वं धनम् अहरन् । धनेशः दुःखी अभवत्। सः रिक्तहस्तः गृहम् आगच्छत्। परन्तु सोमेशः विद्याधनयुक्तः आसीत् । विद्याधनेन युक्तः सः शीघ्रम् एव अतीव प्रसिद्धः अभवत् । तस्य प्रसिद्धिं श्रुत्वा राजा विद्यावन्तं सोमेशम् आहूय तस्य सम्मानम् अकरोत् । सः तस्मै मन्त्रिपदमपि अयच्छत् । सत्यम् एव कथ्यते — 'विद्या एव सर्वत्र पूज्यते ।'

**प्रश्नाः**

I. उचितम् उत्तरं चित्वा लिखत ।
उचित उत्तर चुनकर लिखिए ।
Choose and write the correct answer. *1×2=2*

(अ) द्वे मित्रे कुत्र वसतः स्म ?
(i) विदेशे
(ii) राजप्रासादे
(iii) नगरे
(iv) ग्रामे

(ब) मार्गे के आगच्छन् ?
(i) सैनिकाः
(ii) चौराः
(iii) जनाः
(iv) आरक्षकाः

II. पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×2=4*

(i) कः विद्याधनं प्राप्तवान् ?
(ii) राजा सोमेशाय किम् अयच्छत् ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. *1×4=4*

(क) 'अचिन्तयताम्' इति क्रियापदस्य कर्तृपदं किम् ?

(i) राजा

(ii) सोमेशः

(iii) तौ

(iv) धनेशः

(ख) 'सः तस्मै मन्त्रिपदमपि अयच्छत्' इति वाक्ये 'सः' सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) सोमेशाय

(ii) धनेशाय

(iii) राज्ञे

(iv) चौराय

(ग) 'प्रभूतं' इति पदं कस्य विशेषणपदम् अस्ति ?

(i) विदेशस्य

(ii) विद्यायाः

(iii) परिश्रमस्य

(iv) धनस्य

(घ) 'शनैः' इति पदस्य किं विपरीतपदम् अत्र प्रयुक्तम् ?

(i) शीघ्रं

(ii) वर्षाणि

(iii) व्यतीतानि

(iv) एकदा

IV. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं चित्वा लिखत ।

इस अनुच्छेद के लिए एक उपयुक्त शीर्षक चुनकर लिखिए ।

Choose and write the appropriate title for this passage. *1×2=2*

(i) विदेशभ्रमणम्

(ii) बुद्धिः एव उत्तमा

(iii) विद्याधनं श्रेष्ठधनम्

(iv) परिश्रमस्य महत्त्वम्

## खण्डः ख (Section B)

### रचनात्मककार्यम् (रचनात्मक-कार्य)

### Writing Skills

12 अंकाः

**2.** अनुजं प्रति लिखितम् अधःपत्रं मञ्जूषायां प्रदत्तपदैः पूरयत :

छोटे भाई को लिखे गए निम्नलिखित पत्र को मंजूषा में दिए गए शब्दों से पूर्ण कीजिए :

Complete the following letter, written to your younger brother, with the help of the words given in the box : $\frac{1}{2}\times 8=4$

(i) __________ ।

(ii) __________ शुभाशिषः ।

मन्ये यत् भवान् तत्र (iii) __________ । वयम् अपि अत्र सर्वे (iv) __________ स्मः । मातापितरौ सर्वदा त्वां स्मरतः । तव अग्रजा अग्रिमसप्ताहे गृहम् (v) __________ । त्वम् अपि यदि (vi) __________ इच्छसि आगच्छ । अस्मिन् विषये अग्रजा अपि त्वां पत्रं (vii) __________ । तव अध्ययनं सम्यक् चलति इति वयं चिन्तयामः । अन्यत् सर्वं (viii) __________ । सर्वेभ्यः मित्रेभ्यः मम शुभकामनां कथयतु । भवान् पत्रद्वारा स्वकार्यक्रमं सूचयतु ।

भवतः अग्रजः,

विश्वासः ।

**मञ्जूषा**

| |
|---|
| भुवनेश्वरतः, लेखिष्यति, आगमिष्यति, कुशली, कुशलिनः, आगन्तुम्, कुशलम्, प्रिय अनुज ! |

**3.** अधोदत्त-चित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया **चतुर्षु** संस्कृतवाक्येषु कुरुत :

नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **चार** संस्कृत वाक्यों में कीजिए :

Describe the following picture in **four** Sanskrit sentences with the help of the words given in the box below : *2×4=8*



**मञ्जूषा**

| |
|---|
| उपवनम्, बालिका, मयूरः, शशकः, वानरः, पक्षिणः, पुस्तकं, वृक्षाः, पादपाः, पुष्पाणि, सुन्दरं, इदम्, वृक्षस्य, अधः, पठति, पश्यति, अस्ति, सन्ति, आकाशे, कूजन्ति, खादति, कूर्दति, चलति, यत्र-तत्र, उपरि, प्रसन्नाः । |

**अथवा (OR)**

**केवलं प्रज्ञाचक्षुर्भ्यः (केवल नेत्रहीनों के लिए)**

**For Blind Candidates only**

मञ्जूषायां प्रदत्तपदानां साहाय्येन निम्नलिखितविषयम् अधिकृत्य **चतुर्षु** संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत :

मंजूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **चार** संस्कृत वाक्यों में एक अनुच्छेद लिखिए :

Write a paragraph in **four** Sanskrit sentences on the following topic with the help of the words given in the box : *2×4=8*

"प्रातःकालः"

**मञ्जूषा**

| |
|---|
| सूर्यः, जनाः, वृक्षाः, पुष्पाणि, पक्षिणः, बालकाः, वायुः, दूरे, पशवः, व्यायामं, भ्रमन्ति, क्रीडन्ति, कूजन्ति, वहति, गच्छति, प्रकाशः, अन्धकारः, विकसन्ति, वृक्षेषु, शीतलः । |

## खण्डः ग (Section C)
## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)
## Applied Grammar

28 अंकाः

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत :
निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धिच्छेद करके लिखिए :

Write the underlined words of the following sentences after joining or disjoining Sandhis : *1×4=4*

(i) यदि + अपि सा बालिका तथापि तस्याः उत्साहः अतुल्यः ।

(ii) सर्वे जगत् + नाथं प्रणमन्ति ।

(iii) तत्र एकः बालः + चलति ।

(iv) सैनिकः राष्ट्रस्य नयनम् मन्यते ।

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत :
निम्नलिखित वाक्यों में रेखाङ्कित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए :

Choose and write the correct compound or expound form of the underlined words of the following sentences : *1×6=6*

(क) पिककाकौ कूजतः ।
- (i) पिकः च काकः च तयोः समाहारः
- (ii) पिकाः च काकाः च
- (iii) पिकः च काकः च

(ख) मातापितरौ श्वः गमिष्यतः ।
- (i) मातरः च पितरः च
- (ii) माता च पिता च
- (iii) माता च पिता च एतयोः समाहारः

(ग) अधीतं व्याकरणं येन सः (नरः) आगच्छति ।
- (i) अधीतव्याकरणः
- (ii) अधीतव्याकरणम्
- (iii) अधीतव्याकरणा

(घ) श्वेताम्बरा अत्र विराजते ।

(i) श्वेतम् अम्बरं यस्याः सा

(ii) श्वेतम् अम्बरं यस्य सः

(iii) श्वेतम् अम्बरम्

(ङ) परपीडनं साधुजनस्य रूपस्य योग्यं कार्यं न अस्ति ।

(i) अनुरूपः

(ii) अनुरूपस्य

(iii) अनुरूपम्

(च) सचित्रं पुस्तकम् आनय ।

(i) चित्रस्य भावम्

(ii) चित्रेण सहितम्

(iii) चित्रम् अनतिक्रम्य

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत :

निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए :

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words. Choose the correct answer from the given options : $\frac{1}{2} \times 4 = 2$

(क) गम् + शतृ बालकः कुत्रापि न पश्यति ।

(i) गच्छन्ती

(ii) गच्छन्तम्

(iii) गच्छन्

(iv) गमन्

(ख) क्रूरता सदैव निन्दनीया एव ।

(i) क्रूर + तल्

(ii) क्रूर + त्व

(iii) क्रूरः + तल् + आ

(iv) क्रूर् + तल्

(ग) गायिका मधुरं गीतं गायति ।

(i) गै + इका

(ii) गायक् + टाप्

(iii) गायिक + आ

(iv) गे + इका

(घ) सेव् + शानच् जनाः स्वकर्त्तव्यं निर्वहन्ति ।

(i) सेवमानः

(ii) सेवमानाः

(iii) सेवमानानाम्

(iv) सेवमानैः

**7.** अधोलिखितवाक्ययोः कोष्ठकान्तर्गतयोः पदयोः प्रकृति-प्रत्ययौ संयोज्य लिखत :

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत दिए गए पदों के प्रकृति-प्रत्ययों को जोड़कर लिखिए :

Write the words of the following sentences after joining suffixes to the roots or words given in the brackets : *1×2=2*

(i) बालानां _________ (चपल + त्व) कः न जानाति ?

(ii) ___________ (पठ् + शतृ) बालकः शनैः शनैः वदति ।

**8.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तपदसहायतया उचितैः अव्ययपदैः पूरयित्वा लिखत :

निम्नलिखित वाक्यों में रिक्तस्थानों की पूर्ति मंजूषा में दिए गए उचित अव्ययों के द्वारा कीजिए :

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box : *1×6=6*

(i) भवान् अधुना ________________________ आगच्छति ?

(ii) ते ________________________ पुनः तत्र न गमिष्यतः ।

(iii) यत्र कर्त्तव्यनिष्ठा भवति ________________________ सिद्धिः अपि निवसति ।

(iv) 'अहम् इदं कार्यं पुनः करिष्यामि ।' ________________________ सः दृढतया अवदत् ।

(v) सः तावत् न गमिष्यति ____________ त्वं न आगच्छसि ।

(vi) ____________ ते अपि तत्र गच्छन्ति ।

**मञ्जूषा**

| |
|---|
| यदा-कदा, तत्र, कुतः, यावत्, इति, श्वः । |

**9.** प्रदत्तविकल्पेभ्यः उचितसङ्ख्यापदं चित्वा वाक्यानि पूरयत ।

दिए गए विकल्पों में से उचित संख्या पद चुनकर वाक्य पूर्ण कीजिए ।

Choose the correct numerical words from the options given below and complete the sentences. *1×4=4*

(क) अस्माकं विद्यालये __(4)__ विशालवृक्षाः सन्ति ।

(i) चत्वारि

(ii) चतस्रः

(iii) चतुर्णाम्

(iv) चत्वारः

(ख) __(2)__ बालिकयोः भ्रातरः कुत्र सन्ति ?

(i) द्वौ

(ii) द्वे

(iii) द्वयोः

(iv) द्वाभ्याम्

(ग) उपवने __(1)__ वृक्षस्य शाखायाम् कोकिला कूजति ।

(i) एकः

(ii) एकम्

(iii) एकस्मिन्

(iv) एकस्य

(घ) सरोवरे __(3)__ कमलानि शोभन्ते ।

(i) त्रीणि

(ii) तिस्रः

(iii) त्रिभिः

(iv) त्रयः

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा अशुद्धपदं संशोध्य लिखत :

नीचे दिए गए वाक्यों में रेखांकित पद अशुद्ध हैं । दिए गए विकल्पों में से उचित उत्तर चुनकर अशुद्ध पद को संशोधित कर लिखिए :

Choose the correct answer from the given options and correct the underlined incorrect words in the following sentences : *1×4=4*

(क) ताः पाठं पठसि ।

(i) पठतः

(ii) पठन्ति

(iii) पठथः

(iv) पठथ

(ख) आवाम् ह्यः एव मणिपुरतः आगमिष्यावः ।

(i) आगच्छाव

(ii) आगच्छावः

(iii) आगच्छतु

(iv) आगच्छेत्

(ग) सः बालिका धावति ।

(i) बाला

(ii) बालिके

(iii) बालकः

(iv) बालकौ

(घ) यूयं कुत्र उपविशसि ?

(i) उपविशथ

(ii) उपविशथः

(iii) उपविशन्ति

(iv) उपविशामः

## खण्डः घ (Section D)
## पठित-अवबोधनम् (पठित-अवबोधन)
## Reading Comprehension

28 अंकाः

**11.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानामुत्तराणि लिखत :

निम्नलिखित गद्यांश, पद्यांश और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर लिखिए :

Read the following prose, poetry and drama passages and answer the given questions :

(अ) गद्यांशः

गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् — 'आर्य ! किं सर्वगतं कुशलं वर्तते ? अयथाकालं समागतोऽसि ?' सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत् । बुद्धिमती सा अवदत् — 'अलं चिन्तया । आपदां तरणिः धैर्यम् । इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम् ।'

**प्रश्नाः**

I. एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times 2=1$

(i) विषादं त्यक्त्वा कः कर्त्तव्यः ?

(ii) आपदां तरणिः किम् भवति ?

II. पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 2

पश्चात्तापेन दग्धमानसः सः (प्रच्छन्नभाग्यः) किं निवेद्य उच्चैः अक्रन्दत् ?

III. विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।
विकल्पों में से उचित उत्तर चुनकर लिखिए ।
Choose and write the correct answer from the given options. $\frac{1}{2}\times 2=1$

(क) 'शीघ्रम्' इति अर्थे अस्मिन् अनुच्छेदे किं पदं प्रयुक्तम् ?

(i) इदानीम्
(ii) सम्प्रति
(iii) सपदि
(iv) अयथाकालम्

(ख) 'भार्या' इति कर्तृपदस्य क्रियापदं किम् ?

(i) असि

(ii) क्रियताम्

(iii) वर्तते

(iv) अपृच्छत्

(आ) पद्यांशः

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥

**प्रश्नाः**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. $\frac{1}{2}\times 2=1$

(i) प्राणेभ्योऽपि विशेषतः कः रक्षणीयः ?

(ii) अस्माकं व्यवहारः सम्यग् भवेत् इति केषां वचनम् अस्ति ?

II. पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. 2

प्रथमः धर्मः कः ?

III. विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।

विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the correct answer from the given options. $\frac{1}{2}\times 2=1$

(क) 'धर्मः' इति पदस्य विशेषणपदं किम् ?

(i) आचारः

(ii) वचः

(iii) विशेषतः

(iv) प्रथमः

(ख) 'अतः' इति अर्थे अत्र किं पदं प्रयुक्तम् ?

(i) तस्मात्

(ii) इति

(iii) एतत्

(iv) अपि

(इ) <u>नाट्यांशः</u>

(ततः प्रविशतः व्यासनारदौ)

*नारदः* — (व्यासं प्रति) पश्यतु भवान् ! कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम् । समन्तात् प्रचण्डानलशिखाः आकाशं लिहन्ति इव । गगनात् सहस्रशः उल्काः भूमौ पतन्ति । कम्पते खलु सपर्वत-वन-द्रुमा सकला मही । पवनः स्तब्धः जातः । सहस्रांशुः न भासते । शैलाः विदीर्यन्ते । कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति ।

*व्यासनारदौ* — भो वीरौ ! संहरतम् संहरतम् निजास्त्रे ।

**<u>प्रश्नाः</u>**

I. एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times 2=1$

(i) कौ प्रविशतः ?

(ii) कः स्तब्धः जातः ?

II. पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

गगनात् सहस्रशः उल्काः कुत्र पतन्ति ?

III. विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।
विकल्पों में से उचित उत्तर चुनकर लिखिए ।
Choose and write the correct answer from the given options. $\frac{1}{2}\times 2=1$

(क) 'सकलम्' इति विशेषणपदस्य विशेष्यपदं किम् ?
(i) मही
(ii) जगत्
(iii) शैलाः
(iv) आकाशम्

(ख) 'समन्तात् प्रचण्डानलशिखाः आकाशं लिहन्ति इव' वाक्ये 'लिहन्ति' क्रियापदस्य कर्तृपदं किम् ?
(i) प्रचण्डानलशिखाः
(ii) आकाशं
(iii) समन्तात्
(iv) इव

**12.** अधोलिखितकथ**नयोः** समुचितं भावं विकल्पेभ्यः चित्वा लिखत :
निम्नलिखित **दोनों** कथनों का उपयुक्त भाव विकल्पों में से चुनकर लिखिए :

Choose and write the correct gist of the following **two** sentences from the given options : *1×2=2*

(क) नीरक्षीरविवेके तु हंसो हंसः बको बकः ।

भावः

(i) हंसः बकः च समानौ, तत्र कोऽपि भेदः न अस्ति ।

(ii) हंसः क्षीरं पिबति बकः नीर-क्षीरं च पिबति, अतः तत्र भेदः ।

(iii) 'दुग्धस्य जलस्य च मध्ये किं दुग्धं किं च जलम्' इति विवेकपूर्णकार्ये एव हंसस्य बकस्य च भेदः दृश्यते ।

(ख) सततं चक्रवत् परिवर्तमानः ।

भावः

(i) कालः यदा-कदा चक्रवत् भ्रमति ।

(ii) संसारे भ्रमन् कालः चक्रम् एव अस्ति ।

(iii) कालः चक्रम् इव निरन्तरं गतिशीलः अस्ति ।

**13.** मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोक**द्वयस्य** अन्वयं पूरयत :
मंजूषा में से समुचित पद चुनकर निम्नलिखित **दोनों** श्लोकों के अन्वय को पूर्ण कीजिए :

Complete the prose order of the following **two** shlokas by choosing the appropriate words given in the box : *$\frac{1}{2}$×8=4*

(क) यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः ।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥

अन्वयः

येन (i) ______________ अपि यत् प्रोक्तं तस्य (ii) ______________ येन कर्तुं (iii) ______________ भवेत्, सः (iv) ______________ इति ईरितः ।

(ख) परमापद्गतेनापि नैव तात ! त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥

अन्वयः

(v) ______________ ! परम-आपद्गतेन अपि (vi) ______________ रणे इदम् अस्त्रम् (vii) ______________ मानुषेषु न (viii) ______________ प्रयोक्तव्यम् ।

**मञ्जूषा**

| |
|---|
| विशेषतः, तत्त्वार्थनिर्णयः, केन, तात !, विवेकः, एव, त्वया, शक्यः । |

**14.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।
रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए ।
Frame the questions on the basis of the underlined words. *1×4=4*

(i) <u>चतुर्दशमन्वन्तराणां</u> समूहः कल्पः ।

(ii) <u>अरुणस्य</u> प्रदेशः अरुणाचलः ।

(iii) <u>जलबिन्दुनिपातेन</u> क्रमशः घटः पूर्यते ।

(iv) <u>धैर्यवान्</u> लोके परिभवं न प्राप्नोति ।

**15.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत :
निम्नलिखित वाक्यों को घटना के क्रम के अनुसार लिखिए :

Write the following sentences in their sequential order : $\frac{1}{2}\times 8=4$

(i) 'पक्षिणां राजा कः भवेत्' इति विचिन्त्य तत्र विवादः भवति ।

(ii) मातुः आज्ञया ते मिलित्वा निवसन्ति आनन्देन च नृत्यन्ति ।

(iii) तयोः मध्ये विवादः भवति ।

(iv) सर्वे स्वप्रशंसां कुर्वन्ति ।

(v) सः काकं कटुवचनानि कथयति ।

(vi) तदैव अन्ये अनेके पक्षिणः अपि तत्र प्रविशन्ति ।

(vii) एकदा राजहंसः काकस्य ध्वनिं श्रुत्वा कुपितः भवति ।

(viii) काकः अपि कुपितः भवति ।

**16.** रेखाङ्कितपदानाम् प्रसङ्गानुसारम् अर्थं चित्वा लिखत ।
रेखांकित पदों के प्रसंगानुसार अर्थ चुनकर लिखिए ।

Choose and write the correct contextual meanings of the underlined words. *1×2=2*

(क) अये ! कथम् इमं <u>सङ्कल्पं</u> श्रुत्वा विस्मिताः यूयम् ?
- (i) कल्पनां
- (ii) धार्मिकानुष्ठानस्य प्रतिज्ञां
- (iii) प्रलयम्
- (iv) सुन्दरं वचनम्

(ख) <u>साधु</u> पृष्टम् ! अत्र अनेके प्रमुखोत्सवाः ।
- (i) उचितम्
- (ii) साधुः
- (iii) श्रेष्ठः जनः
- (iv) सज्जनः